## प्रकृत्यैकाच् । (१६३/२०१०)

एकाच् यद् [1]भसञ्ज्ञकं तद् [2]इष्ठेमेयस्सु परतः प्रकृत्या भवति । स्रग्विन्नित्येतस्य विन्नन्तस्य स्रजिष्ठः, स्रजीयान्, स्रजयति । स्रुग्वदित्येतस्य मत्वन्तस्य स्रुचिष्ठः, स्रुचीयान्, स्रुचयति । एकाच् इति किम् ? [3]वसुमत् इत्येतस्य वसिष्ठः, वसीयान् ।

[८१४] प्रकृत्याऽके राजन्यमनुष्ययुवानः[4] । (म. भा. ३.२३३)

अके प्रत्यये परतो राजन्य मनुष्य युवन् इत्येते प्रकृत्या भवन्ति । राजन्यानां समूहो राजन्यकम् । [5]मनुष्याणां समूहो मानुष्यकम् । 'आपत्यस्य च तद्धितेऽनाति' (६.४.१५१/१०८२) इति [6]यलोपः प्रकृतिभावेन न भवति । यूनो भावः यौवनिका । मनोज्ञादित्वाद् वुञ् । तस्य 'नस्तद्धिते' (६.४.१४४/६७९) इति टिलोपो न भवति ॥

## इनण्यनपत्ये । (१६४/१२४८)

इन्नन्तम[7]नपत्यार्थे अणि परतः प्रकृत्या भवति । [8]साङ्कूटिनम् । सांराविणम् । सांमार्जिनम् । [9]'अभिविधौ भाव इनुण्' (३.३.४४/३२१८), 'अणिनुणः' (५.४.१५/३२१९) इत्यण् । [10]स्राग्विण इदम् स्राग्विणम् । अणि इति किम् ? दण्डिनां समूहो दाण्डम् । 'अनुदात्तादेरञ्' (४.२.४४/१२५३) इति [11]अञ्प्रत्ययः । अनपत्ये इति किम् ? मेधाविनोऽपत्यं मैधावः ॥

## गाथिविदथिकेशिगणिपणिनश्च । (१६५/१२७८)

गाथिन् विदथिन् केशिन् गणिन् पणिन् इत्येते च अणि [12]प्रकृत्या भवन्ति । [13]गाथिनः अपत्यं गाथिनः । वैदथिनः । कैशिनः । गाणिनः । [14]पाणिनः । अपत्यार्थोऽयमारम्भः ॥

## संयोगादिश्च । (१६६/११५६)

संयोगादिश्च इन् अणि [15]प्रकृत्या भवति । शाङ्खिनोऽपत्यं शाङ्खिनः । माद्रिणः । वाज्रिणः[16] ॥

## अन् । (१६७/११५८)

अन्नन्तमणि [17]प्रकृत्या भवति अपत्ये चानपत्ये च । सामनः । वैमनः । [18]सौत्वनः । [19]जैत्वनः ॥

---

1. भं. फ. 2. इष्ठादिषु फ. 3. वसुमन्तमाचष्टे इति वसयति ह. 4. इति वक्तव्यम् इत्यधिकम् ह. 5. मनुष्याणां समूहो नास्ति फ. 6. तत्र यकारलोपः ह. 7. अनपत्येऽर्थे कः 8. साङ्कोटिनम् क. ह. 9. वाक्यमिदं नास्ति ब. क. फ. 10. उदाहरणमिदं नास्ति फ. 11. अञ् फ. 12. परतः इत्यधिकम् फ. 13. गाथिनोऽपत्यं नास्ति फ. 14. पाणिनः नास्ति क. 15. परतः इत्यधिकम् फ. 16. चाक्रिणः इत्यधिकम् ब. फ. इ. 17. परतः इत्यधिकम् फ. 18. नास्ति ड. फ. 19. नास्ति फ.